# अथ पुरुषसूक्तम्

## atha puruṣasūktam

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्॥ १॥
om sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt |
sa bhūmiṁ viśvato vṛtvā | | atyatiṣṭhaddaśāṅgulam || 1 ||

पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानः। यदन्नेनातिरोहति॥ २॥
puruṣa evedam̐ sarvam | yadbhūtaṁ yacca bhavyam |
utāmṛtatvasyeśānaḥ | yadannenātirohati || 2 ||

एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः।
पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि॥ ३॥
etāvānasya mahimā | ato jyāyām̐śca pūruṣaḥ |
pādo'sya viśvā bhūtāni | tripādasyāmṛtaṁ divi || 3 ||

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः।
ततो विश्वङ्व्यक्रामत्। साशनानशने अभि॥ ४॥
tripādūrdhva udaitpuruṣaḥ | pādo'syehā''bhavātpunaḥ |
tato viśvaṅvyakrāmat | sāśanānaśane abhi || 4 ||

तस्माद्विराडजायत। विराजो अधि पूरुषः।
स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥ ५॥
tasmādvirāḍajāyata | virājo adhi pūruṣaḥ |
sa jāto atyaricyata | paścādbhūmimatho puraḥ || 5 ||

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ॥ ६ ॥
yatpuruṣeṇa haviṣā | devā yajñamatanvata |
vasanto asyāsīdājyam | grīṣma idhmaśśaraddhaviḥ || 6 ||

सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ॥ ७ ॥
saptāsyāsanparidhayaḥ | triḥ sapta samidhaḥ kṛtāḥ |
devā yadyajñaṁ tanvānāḥ | abadhnanpuruṣaṁ paśum || 7 ||

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥ ८ ॥
taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ |
tena devā ayajanta | sādhyā ṛṣayaśca ye || 8 ||

तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ॥ ९ ॥
tasmādyajñātsarvahutaḥ | sambhṛtaṁ pṛṣadājyam |
paśūm̐stām̐ścakre vāyavyān | āraṇyāngrāmyāśca ye || 9 ||

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ १० ॥
tasmādyajñātsarvahutaḥ | ṛcaḥ sāmāni jajñire |
chandām̐si jajñire tasmāt | yajustasmādajāyata || 10 ||